# Shri Ganesha Stotram Sadhukritam

# સાધુકૃતં શ્રીગણેશસ્તોત્રમ્

## Document Information

Text title : Shri Ganesha Stotram Sadhukritam

File name : gaNeshastotramsAdhukRRitaM.itx

Category : ganesha, mudgalapurANa, stotra, dvAdasha

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM aShTamaH khaNDaH | adhyAyaH 24 | 8.24 21-46||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 4, 2024

*sanskritdocuments.org*

# સાધુકૃતં શ્રીગણેશસ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥

સાધુરુવાચ ।

હેરમ્બાય નમસ્તુભ્યં ત્રિનેત્રાય પરાત્મને ।

અનાકારાય દેવાય સાકારાય નમો નમઃ ॥ ૨૧॥

લમ્બોદરાય વીરાય શૂર્પકર્ણાય ઢુણ્ઢયે ।

અનાદયે પરેશાય ગણેશાય નમો નમઃ ॥ ૨૨॥

સ્વાનન્દવાસિને તુભ્યં ભક્તભાવસ્વરૂપિણે ।

ભક્તેશાય સુભક્ત્યા વૈ સન્તુષ્ટાય નમો નમઃ ॥ ૨૩॥

સર્વાકારાય સર્વાદિપૂજ્યાય પરમાત્મને ।

બ્રહ્મેશાય ગણાનાં તે પાલકાય નમો નમઃ ॥ ૨૪॥

નિરાકારાય સર્વેષાં પૂજ્યાય પરમપ્રિય ।

વિઘ્નેશાય મહાવિઘ્નહારિણે તે નમો નમઃ ॥ ૨૫॥

માત્રે પિત્રે સમસ્તાનાં તત્ત્વરૂપાય તે નમઃ ।

બ્રહ્મણે વિષ્ણવે તુભ્યં શઙ્કરાય નમો નમઃ ॥ ૨૬॥

શક્તયે સૂર્યરૂપાયેન્દ્રાય વાયુસ્વરૂપિણે ।

ચન્દ્રાય વરુણાયૈવ યમાય તે નમો નમઃ ॥ ૨૭॥

અગ્નયે નૈરૃતાયૈવ કુબેરાય ધરાધર ।

નરાય પશુરૂપાય નમો નાગાસુરાય તે ॥ ૨૮॥

ચરાચરમયાયૈવ ચરાચરવિવર્જિત ।

સમાય સહજાયૈવ સ્વસંવેદ્યાય તે નમઃ ॥ ૨૯॥

યોગાય શાન્તિનાથાય શાન્તિદાય નમો નમઃ ।

કિં સ્તૌમિ ત્વાં ગણાધીશ યોગાકાર નમો નમઃ ॥ ૩૦॥

ધન્યોઽહં સર્વભાવેન તવાઙ્ઘ્રિયુગદર્શનાત્ ।

વરં દેહિ ગણેશાન તવ ભક્તિં દૃઢાત્મિકામ્ ॥ ૩૧॥

એવં સ્તુત્વા ગણાધીશં સાધુસ્તં પ્રણનામ ચ ।

તમુવાચ ગણેશાનો ભક્તં ભક્તજનપ્રિયઃ ॥ ૩૨॥
(ફલશ્રુતિઃ)
શ્રીગણેશ ઉવાચ ।
મદીયા ભક્તિરુગ્રા તે ભવિષ્યતિ મહામતે ।
યદ્યદિચ્છસિ તત્તત્તે સફલં પ્રભવિષ્યતિ ॥ ૩૩॥
ત્વયા કૃતં મદીયં યત્ સ્તોત્રં ભક્તિવિવર્ધનમ્ ।
ભવિષ્યતિ મહાભાગ પઠતાં શ ृણ્વતાં સદા ॥ ૩૪॥
સર્વસિદ્ધિપ્રદં પૂર્ણં મત્પ્રસાદાદિદં પરમ્ ।
નાનાકાર્યકરં ભાવિ અન્તે સ્વાનન્દદાયકમ્ ॥ ૩૫॥
એવમુક્ત્વાંઽતર્દધેઽસૌ ગણેશો બ્રહ્મનાયકઃ ।
સાધુસ્તં હૃદિ સન્ધ્યાત્વાઽભવત્તત્રૈવ સંસ્થિતઃ ॥ ૩૬॥
એવં નાના જના વિપ્ર સિદ્ધિં પ્રાપ્તા વિશેષતઃ ।
માર્ગશીર્ષવ્રતેનૈવ ગાણપત્યપરાયણાઃ ॥ ૩૭॥
અન્યચ્ચ શ ृણુ વિપ્રેન્દ્ર ચરિત્રં સર્વસિદ્ધિદમ્ ।
માર્ગશીર્ષભવં ચિત્રં શ્રવણાત્ પઠનાન્નૃણામ્ ॥ ૩૮॥
એકઃ કૈવર્તકઃ કશ્ચિન્નામ્ના શમ્બુરિતિ સ્મૃતઃ ।
સ માર્ગશીર્ષમાહાત્મ્યં શુશ્રાવ ગણપાશ્રિતમ્ ॥ ૩૯॥
સમાગતે માર્ગશીર્ષે સ્નાનં કૃત્વા મહામતિઃ ।
ગણેશં પ્રણનામાઽથ નિત્યં કુટુમ્બપોષકઃ ॥ ૪૦॥
તતઃ પરં નૃપસ્યૈવ ચકાર સેવનં સદા ।
પૌષે મૃતશ્ચ તં ધૃત્વા ગાણેશાઃ સ્વપદં યયુઃ ॥ ૪૧॥
તત્ર વિઘ્નેશ્વરં દૃષ્ટ્વા બ્રહ્મભૂતો બભૂવ હ ।
માર્ગશીર્ષવ્રતં તેન કૃતમંશપ્રકારતઃ ॥ ૪૨॥
તદપિ બ્રહ્મભૂતઃ સ બભૂવ વ્રતસેવનાત્ ।
એવં નાના જના બ્રહ્મન્ સિદ્ધિં પ્રાપ્તા વ્રતેન વૈ ॥ ૪૩॥
ઇહ ભુક્ત્વાઽખિલાન્ ભોગાનન્તે સ્વાનન્દગામિનઃ ।
કિઞ્ચિન્નિયમસંયુક્તાઃ કિં પુનર્વિધિચારિણઃ ॥ ૪૪॥
ઇદં યઃ શ ृણુયાન્નિત્યં માર્ગશીર્ષે નરોત્તમઃ ।
પઠેત્ સ સિદ્ધિસંયુક્તો ભવિષ્યતિ નિરન્તરમ્ ॥ ૪૫॥
માર્ગશીર્ષવ્રતસ્યૈવ માહાત્મ્યં લેશતો મયા ।
કથિતં કિં પુનઃ શ્રોતુમિચ્છસિ મુનિસત્તમ ॥ ૪૬॥

ઇતિ સાધુકૃતં શ્રીગણેશસ્તોત્રં સમ્પૂર્ણમ્ ॥

દ્વાદશસ્તોત્રમ્

- ॥ મુદ્ગલપુરાણં અષ્ટમઃ ખણ્ડઃ । અધ્યાયઃ ૨૪ । ૮.૨૪ ૨૧-૪૬ ॥

- .. mudgalapurANaM aShTamaH khaNDaH . adhyAyaH 24 . 8.24 21-46..

Proofread by Yash Khasbage, Preeti Bhandare

---

*Shri Ganesha Stotram Sadhukritam*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*